# Surya Mahatmyam

# સૂર્યમાહાત્મ્યમ્

## Document Information

Text title : Surya Mahatmyam

File name : sUryamAhAtmyam.itx

Category : navagraha, vAsudevAnanda-sarasvatI, mAhAtmya

Location : doc_z_misc_navagraha

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# સૂર્યમાહાત્મ્યમ્

યસ્યોદયાસ્તસમયે શિવાદ્યા અપિ ચાઞ્જલિમ્ ।
બધ્નન્તિ વિશ્વસાક્ષી સ પ્રત્યક્ષઃ શ્રૂયતે રવિઃ ॥ ૧॥

યદધીના કાલગતિર્યદધીનાઃ ક્રિયાઃ સમાઃ ।
યન્મન્ત્રેણ દ્વિજત્વાપ્તિર્યન્મન્ત્રેણ કૃતાર્થતા ॥ ૨॥

લૌકિક્યપિ વ્યવહૃતિર્યત્પ્રસાદાત્પ્રવર્તતે ।
સ્મર્યતેઽસ્માદ્વિશ્વસૃષ્ટિઃ સવિતુઃ શ્રૂયતેઽપિ ચ ॥ ૩॥

જગતસ્તસ્થુષશ્ચાત્મા સૂર્યસ્તં બહુધા જગુઃ ।
મૂર્તામૂર્તં જગત્સર્વં પ્રાણાપાનાત્મકં શ્રુતમ્ ॥ ૪॥

પ્રાણઃ સૂર્યોઽપરશ્ચન્દ્રસ્તયોઃ સર્વં પ્રતિષ્ઠિતમ્ ।
શ્રીસૂર્યકિરણાવેશાચ્ચન્દ્રસ્યાપિ ચ ચન્દ્રતા ॥ ૫॥

અતશ્ચન્દ્રો ન ભિન્નોઽસ્માત્સ સૂર્યઃ સકલાત્મકઃ ।
યં વિના જગદાન્ધ્યં હિ સ દેવઃ કૈર્ન પૂજ્યતે ॥ ૬॥

તમોઽમું ગ્રસતીત્યેષ દૃષ્ટવાદો ન તાત્ત્વિકઃ ।
તસ્માદ્ભક્તેષ્ટદો દેવો વરોઽર્કશ્ચાપરાજિતઃ ॥ ૭॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં સૂર્યમાહાત્મ્યં સમ્પૂર્ણમ્ ।

*Surya Mahatmyam*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*